त्रिकण्टकारग्वधदर्भकाश-
दुरालभापर्व्वतभेदपथ्या: ।
निघ्नन्ति पीता मधुनाश्मरीञ्च
संप्राप्तमृत्योरपि मूत्रकृच्छ्रम् ॥"

इति त्रिकण्टकादि ॥ २०० ॥

"कषायोऽतिबलामूलसाधितोऽशेषकृच्छ्रजित् ॥"

इति अतिबलाकषाय: ॥ २०१ ॥

इति मूत्रकृच्छ्राधिकार: ॥ * ॥

अथ मूत्राघाते ।
"मूत्राघातान् यथादोषं मूत्रकृच्छ्रहरैर्जयेत् ।
पिबेच्छिलाजतुक्वाथे गणे वीरतरादिके ॥"

इति शिलाजतुयुक्तवीरतरादिकाथ: ॥२०२॥

" रसं दुरालभाया वा कषायं वासकस्य वा ॥"

इति दुरालभारसवासाकषायौ ॥ २०३ ॥

इति मूत्राघाताधिकार: ॥ * ॥

अथाश्मर्य्याम् ।
"वरुणस्य त्वचं श्रेष्ठां शुण्ठीगोक्षुरसंयुताम् ।
यवक्षारगुड़ं दत्त्वा क्वाथयित्वा पिबेद्धिताम् ॥
अश्मरीं वातजां हन्ति चिरकालानुबन्धिनीम् ॥"

इति वरुणत्वगादि ॥ २०४ ॥

"वीरतर: सहचरौ दर्भो वृक्षादनी नल: ।
गुन्द्रा काशकुशावश्मभेदमोरटटुण्टुका: ॥
कुरुण्टकोऽथ वशिरो वसुक: साग्निमन्थक: ।
इन्दीवरी श्वदंष्ट्रा च तथा कापोतवक्त्रक: ॥
वीरतरादिरित्येष गणो वातविकारनुत् ।
अश्मरीशर्करामूत्रकृच्छ्राघातरुजापह: ॥"

इति वीरतरादिगणक्वाथ: ॥२०५॥

"शुण्ठ्यग्निमन्थपाषाणशिग्रुवरुणगोक्षुरै: ।
अभयारग्वधफलै: क्वाथं कुर्य्याद्विचक्षण: ॥
रामठक्षारलवणचूर्णं दत्त्वा पिबेन्नर: ।
अश्मरीमूत्रकृच्छ्रघ्नं पाचनं दीपनं परम् ॥
हन्यात् कोष्ठाश्रितं वातं कट्यूरुगुदमेढ्रगम् ॥"

इति शुण्ठ्यादि ॥ २०६ ॥

"वरुणत्वक्कषायन्तु पीतन्तु गुड़संयुतम् ।
अश्मरीं पातयत्याशु वस्तिशूलविनाशनम् ॥"

इति वरुणक्वाथ: ॥ २०७ ॥

"पिबेद्वरुणमूलत्वक्क्वाथं तत्कल्कसंयुतम् ॥"

इति वरुणकल्कयुक्तवरुणत्वक्कषाय: ॥२०८॥

"क्वाथश्च शिग्रुमूलोत्थ: कदुष्णोऽश्मरिपातन: ॥"

इति शिग्रुक्वाथ: ॥ २०९ ॥

"नागरवरुणकगोक्षुरपाषाणभित्कपोतवङ्कज:
क्वाथ: ।
गुड़यावशूकमिश्र: पीतो हन्त्यश्मरीमुग्राम् ॥"

इति नागरादि ॥ २१० ॥

"वरुणत्वक्शिलाभेदशुण्ठीगोक्षुरकै: कृत: ।
कषाय: क्षारसंयुक्त: शर्कराञ्च भिनत्त्यपि ॥"

इति वरुणत्वगादि ॥ २११ ॥

"श्वदंष्ट्रैरण्डपत्राणि नागरं वरुणत्वचम् ।
एतत्क्वाथवरं प्रात: पिबेदश्मरिभेदनम् ॥"

इति श्वदंष्ट्रादि ॥ २१२ ॥

"एलोपकुल्यामधुकाश्मभेद-
कौन्तीश्वदंष्ट्रावृषकोरुबूकै: ।
क्वाथं पिबेदश्मजतुप्रगाढ़ं
सशर्करे साश्मरिमूत्रकृच्छ्रे ॥"

इति एलादि ॥२१३॥

"शुक्राश्मर्य्यान्तु सामान्यो विधिरश्मरिनाशन: ॥"

इत्यश्मरीशर्कराधिकार: ॥*॥

अथ मेहे ।
"दूर्व्वाकशेरुपूतीककुम्भीकशैवलम् ।
जले नि:क्वथितं पीतं शुक्रमेहहरं परम् ॥"

इति दूर्व्वादि ॥ २१४ ॥

"त्रिफलारग्वधद्राक्षाकषायो मधुना युत: ।
पीतो निहन्ति फेनाख्यं प्रमेहं नियतं नृणाम् ॥"

इति त्रिफलादि ॥ २१५ ॥

"लोध्राभयाकट्फलमुस्तकानां
विड़ङ्गपाठार्ज्जुनधन्वनानाम् ।
कदम्बशालार्ज्जुनदीप्यकानां
विड़ङ्गदार्व्वीधवशल्यकानाम् ॥
चत्वार एते मधुना कषाया:
कफप्रमेहेषु निषेवणीया: ॥
अश्वत्थाच्चतुरङ्गुल्या न्यग्रोधादे: फलत्रयात् ।
सजिङ्गिरक्तसाराच्च क्वाथा: पञ्च समाक्षिका: ॥
नीलहारिद्रशुक्राख्यान् क्षारमाञ्जिष्ठसाह्वयान् ।
मेहान् हन्यु: क्रमादेते सक्षौद्रो रक्तमेह-
जित् ॥
क्वाथ: खर्ज्जूरकाश्मर्य्यतिन्दुकास्थ्यमृताकृत: ॥"

इति खर्ज्जूरादि ॥ २१६ ॥

"लोध्रार्ज्जुनोशीरकुचन्दनानाम् २१७
अरिष्टसेव्यामलकाभयानाम् । २१८ ।
धात्र्यर्ज्जुनारिष्टकवत्सकानां २१९
नीलोत्पलैलातिनिशार्ज्जुनानाम् ॥ २२० ॥
चत्वार एते विहिता: कषाया:
पित्तप्रमेहे मधुसंप्रयुक्ता: ॥"

इति कषायचतुष्टयम् ॥ २२१ ॥

"छिन्नावह्निकषायेण पाठाकुटजरामठम् ।
तिक्तां कुष्ठञ्च सञ्चूर्ण्य सर्पिर्मेहे पिबेन्नर: ॥"

इति छिन्नावह्निकषाय: ॥ २२२ ॥

"कदरखदिरपूगक्वाथं क्षौद्राढ्ये पिबेत् ॥"

इति कदरादि ॥ २२३ ॥

"अग्निमन्थकषायन्तु वसामेहे प्रयोजयेत् ॥"

इति अग्निमन्थकषाय: ॥२२४॥

"पाठाशिरीषदुस्पर्शमूर्व्वा: किंशुकतिन्दुकौ ।
कपित्थानां भिषक् क्वाथं हस्तिमेहे प्रयोजयेत् ॥"

इति पाठादि ॥ २२५ ॥

"कषायस्त्रिफलादारुमुस्तकैरथवा कृत: ॥"

इति त्रिफलादि ॥ २२६ ॥

"फलत्रिकं दारु निशां विशालां
मुस्तञ्च निष्क्वाथ्य निशांशकल्कम् ।
पिबेत् कषायं मधुसंप्रयुक्तं
सर्व्वप्रमेहेषु समुत्थितेषु ॥"

इति फलत्रिकादि ॥ २२७ ॥

"कटङ्कटेरीमधुकत्रिफलाचित्रकै: समै: ।
सिद्ध: कषाय: पातव्य: प्रमेहाणां विनोत्थित: ॥"

इति कटङ्कटेर्य्यादि ॥ २२८ ॥

"त्रिफलादारुदार्व्व्यब्दक्वाथ: क्षौद्रेण मेहहा ॥"

इति त्रिफलादि ॥ २२९ ॥

"कुटजासनदार्व्व्यब्दफलत्रयभवोऽथवा ॥"

इति कुटजादि ॥ २३० ॥

इति प्रमेहाधिकार: ॥ * ॥

अथोदरे ।
"पयसा सत्रिवृत्कल्केनोरुबूकशृतेन वा ।
सप्तलाशङ्खिनीकल्कैर्वा" — 

इति त्रिवृत्कल्कयुक्तारग्वधक्वाथैरण्डक्वाथौ ॥
२३१ ॥

"सन्निपातोदरे सर्व्वां यथोक्तां कारयेत् क्रियाम् ।
पीत: शोथोदरं हन्यात् पिप्पलीमरिचान्वित: ॥
अम्लवेतससंयुक्त: शिग्रुक्वाथ: ससैन्धव: ॥"

इति शिग्रुक्वाथ: ॥ २३२ ॥

"दशमूलदारुनागरच्छिन्नरुहापुनर्नवाक्वाथ: ।
जयति जलोदरशोथश्लीपदगलगण्डवात-
रोगांश्च ॥"

इति दशमूलादि ॥ २३३ ॥

"हरीतकीनागरदेवदारु
पुनर्नवाच्छिन्नरुहाकषाय: ।
सगुग्गुलुर्मूत्रयुतश्च पेय:
शोथोदराणां प्रवर: प्रयोग: ॥"

इति हरीतक्यादि ॥ २३४ ॥

"एरण्डतैलं दशमूलमिश्रं
गोमूत्रयुक्तस्त्रिफलारसो वा ।
निहन्ति वातोदरशोथशूलं
क्वाथ: समूत्रो दशमूलजश्च ॥"

इति एरण्डतैलेन गोमूत्रेण वा युक्ता दशमूली ॥
२३५ ॥

"पुनर्नवानिम्बपटोलशुण्ठी-
तिक्तामृतादार्व्वभयाकषाय: ।
सर्व्वाङ्गशोथोदरकासशूल-
श्वासान्वितं पाण्डुगदं निहन्ति ॥"

इति पुनर्नवाष्टकम् ॥ २३६ ॥

"पुनर्नवादार्व्वभयागुडूचीं
पिबेत् समूत्रां महिषाक्षयुक्ताम् ।
त्वग्दोषशोथोदरपाण्डुरोग-
स्थौल्यप्रसेकोर्द्धकफामयेषु ॥"

इति पुनर्नवाचतुष्कम् ॥ २३७ ॥

इति उदराधिकार: ॥ * ॥

अथ शोथे ।
"शुण्ठीपुनर्नवैरण्डपञ्चमूलशृतं जलम् ।
वातिके श्वयथौ शस्तं पानाहारपरिग्रहे ॥"

इति शुण्ठ्यादि ॥ २३८ ॥

"दशमूलं सर्व्वथा च शस्तं वाते विशेषत: ॥"

इति दशमूलम् ॥ २३९ ॥

"क्षीराशन: पित्तकृतेऽथ शोथे
त्रिवृद्गुडूचीत्रिफलाकषायम् ।
पिबेन्नवां मूत्रविमिश्रितं वा
फलत्रिकाचूर्णमथाक्षमात्रम् ॥"

इति त्रिवृतादि ॥ २४० ॥

"अभया दारु मधुकं तिक्ता दन्ती सपिप्पली ।